# Shivena Kumaropadeshe Prapanchasya Chinmayatvakathanam

# ஶிவேந குமாரோபதே³ஶே ப்ரபஞ்சஸ்ய சிந்மயத்வகத²நம்

## Document Information

Text title : Shivena Kumaropadeshe Prapanchasya Chinmayatvakathanam

File name : shivenakumAropadesheprapanchasyachinmayatvakathanam.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 6 | 26-45a ||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

## Shivena Kumaropadeshe Prapanchasya Chinmayatvakathanam

# ஶிவேந குமாரோபதே3ஶே ப்ரபஞ்சஸ்ய சிந்மயத்வகத2நம்

(ஸர்வம் சிந்மயமேவ ஹி)

தந்மாத்ரம் ஸர்வசிந்மாத்ரமக2ண்டை3கரஸம் ஸதா3 ।
ஏகவர்ஜிதசிந்மாத்ரம் ஸர்வம் சிந்மயமேவ ஹி ॥ 6.26 ॥

இத3ம் ச ஸர்வம் சிந்மாத்ரம் ஸர்வம் சிந்மயமேவ ஹி ।
ஆத்மாபா4ஸம் ச சிந்மாத்ரம் ஸர்வம் சிந்மயமேவ ஹி (சிந்மாத்ராந்நாஸ்தி கிஞ்சந) ॥ 6.27 ॥

ஸர்வலோகம் ச சிந்மாத்ரம் ஸர்வம் சிந்மயமேவ ஹி ।
த்வத்தா மத்தா ச சிந்மாத்ரம் சிந்மாத்ராந்நாஸ்தி கிஞ்சந ॥ 6.28 ॥

ஆகாஶோ பூ4ர்ஜலம் வாயுரக்3நிர்ப்3ரஹ்மா ஹரி: ஶிவ: ।
யத்கிஞ்சித3ந்யத்கிஞ்சிச்ச ஸர்வம் சிந்மயமேவ ஹி ॥ 6.29 ॥

அக2ண்டை3கரஸம் ஸர்வம் யத்3யச்சிந்மாத்ரமேவ ஹி ।
பூ4தம் ப4வ்யம் ச சிந்மாத்ரம் ஸர்வம் சிந்மயமேவ ஹி ॥ 6.30 ॥

த்3ரவ்யம் காலஶ்ச சிந்மாத்ரம் ஜ்ஞாநம் சிந்மயமேவ ச ।
ஜ்ஞேயம் ஜ்ஞாநம் ச சிந்மாத்ரம் ஸர்வம் சிந்மயமேவ ஹி ॥ 6.31 ॥

ஸம்பா4ஷணம் ச சிந்மாத்ரம் வாக்ச சிந்மாத்ரமேவ ஹி ।
அஸச்ச ஸச்ச சிந்மாத்ரம் ஸர்வம் சிந்மயமேவ ஹி ॥ 6.32 ॥

ஆதி3ரந்தம் ச சிந்மாத்ரம் அஸ்தி சேச்சிந்மயம் ஸதா3 ।
ப்3ரஹ்மா யத்3யபி சிந்மாத்ரம் விஷ்ணுஶ்சிந்மாத்ரமேவ ஹி ॥ 6.33 ॥

ருத்3ரோऽபி தே3வாஶ்சிந்மாத்ரம் அஸ்தி நரதிர்யக்ஸுராஸுரம் ।
கு3ருஶிஷ்யாதி3 ஸந்மாத்ரம் ஜ்ஞாநம் சிந்மாத்ரமேவ ஹி ॥ 6.34 ॥

த்3ரு'க்3த்3ரு'ஶ்யம் சாபி சிந்மாத்ரம் ஜ்ஞாதா ஜ்ஞேயம் த்4ருவாத்4ருவம் ।
ஸர்வாஶ்சர்யம் ச சிந்மாத்ரம் தே3ஹம் சிந்மாத்ரமேவ ஹி ॥ 6.35 ॥

லிங்க3ம் சாபி ச சிந்மாத்ரம் காரணம் கார்யமேவ ச ।

மூர்தாமூர்தம் ச சிந்மாத்ரம் பாபபுண்யமதா2பி ச ॥ 6.36॥

த்3வைதாத்3வைதம் ச சிந்மாத்ரம் வேத3வேதா3ந்தமேவ ச ।
தி3ஶோऽபி விதி3ஶஸ்சைவ சிந்மாத்ரம் தஸ்ய பாலகா: ॥ 6.37॥

சிந்மாத்ரம் வ்யவஹாராதி3 பூ4தம் ப4வ்யம் ப4வத்ததா2 ।
சிந்மாத்ரம் நாமரூபம் ச பூ4தாநி பு4வநாநி ச ॥ 6.38॥

சிந்மாத்ரம் ப்ராண ஏவேஹ சிந்மாத்ரம் ஸர்வமிந்த்3ரியம் ।
சிந்மாத்ரம் பஞ்சகோஶாதி3 சிந்மாத்ராநந்த3முச்யதே ॥ 6.39॥

நித்யாநித்யம் ச சிந்மாத்ரம் ஸர்வம் சிந்மாத்ரமேவ ஹி ।
சிந்மாத்ரம் நாஸ்தி நித்யம் ச சிந்மாத்ரம் நாஸ்தி ஸத்யகம் ॥ 6.40॥

சிந்மாத்ரமபி வைராக்3யம் சிந்மாத்ரகமித3ம் கில ।
ஆதா4ராதி3 ஹி சிந்மாத்ரம் ஆதே4யம் ச முநீஶ்வர ॥ 6.41॥

யச்ச யாவச்ச சிந்மாத்ரம் யச்ச யாவச்ச த்3ரு’ஶ்யதே ।
யச்ச யாவச்ச தூ3ரஸ்த2ம் ஸர்வம் சிந்மாத்ரமேவ ஹி ॥ 6.42॥

யச்ச யாவச்ச பூ4தாநி யச்ச யாவச்ச வக்ஷ்யதே ।
யச்ச யாவச்ச வேதோ3க்தம் ஸர்வம் சிந்மாத்ரமேவ ஹி ॥ 6.43॥

சிந்மாத்ரம் நாஸ்தி ப3ந்த4ம் ச சிந்மாத்ரம் நாஸ்தி மோக்ஷகம் ।
சிந்மாத்ரமேவ ஸந்மாத்ரம் ஸத்யம் ஸத்யம் ஶிவம் ஸ்ப்ரு’ஶே ॥ 6.44॥

ஸர்வம் வேத3த்ரயப்ரோக்தம் ஸர்வம் சிந்மாத்ரமேவ ஹி । 45அ

॥ இதி ஶிவரஹஸ்யாந்தர்க3தே ஶிவேந குமாரோபதே3ஶே ப்ரபஞ்சஸ்ய சிந்மயத்வகத2நம் ஸம்பூர்ணம் ॥

- ॥ ஶ்ரீஶிவரஹஸ்யம் । ஶங்கராக்2ய: ஷஷ்டா2ம்ஶ: । அத்4யாய: 6 । 26-45அ ॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 6 . 26-45a ..

Notes :
Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita. Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

*Shivena Kumaropadeshe Prapanchasya Chinmayatvakathanam*

pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*